# Shrijanakajaprapattisara Stotram

# શ્રીજનકજાપ્રપત્તિસારસ્તોત્રં

## Document Information

Text title : Shri Khojidevacharyavirachitam Shrijanakajaprapattisara Stotram

File name : janakajAprapattisArastotraMkhojIdevAchArya.itx

Category : raama, rAmAnanda, prapatti, stotra

Location : doc_raama

Author : khojIdevAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

Shrijanakajaprapattisara Stotram

# શ્રીજનકજાપ્રપત્તિસારસ્તોત્રં

ન વાગ્વપુર્બુદ્ધિભિરેવ કસ્યચિત્ કદાપિ હિંસાઽસ્તુ શરીરિણો વૃથા ।
ભવત્પદામ્ભોરુહચિન્તનં વિના ન ચાપયાત્વમ્બુજવીક્ષણે ક્ષણઃ ॥ ૧॥

હસન્તુ નિન્દન્તુ વદન્તુ દુર્વચો જના નિયુક્તા હૃદયસ્થિતેન વૈ ।
કેનાપિ દેવેન યદાશ્રિતં સદા ન સંસ્થિતિં સ્વાં પ્રજહાતુ મે મનઃ ॥ ૨॥

નિન્દા ભયં મેઽસ્તુ તથા ન જાતુચિદ્ યથેહ નિન્દ્યાચરણાન્મમોરસિ ।
પરોપકારાય સદાઽસ્તુ મે મતિર્ન ચાપકારાય કદાપિ કસ્યચિત્ ॥ ૩॥

ન ક્રૂરદૃષ્ટિર્મમ સત્સુ ભૂયાન્નિરીક્ષ્ણ્યમાણોઽસ્ય સકોપનેત્રૈઃ ।
માસેવતસ્તાનવિપકબુદ્ધ્યા સાધૂન્ મદો મે હૃદયં વૃણોતુ ॥ ૪॥

અપાત્રપૂજા ન ચ પાત્રહેલનં તિરસ્ક્રિયા નાપ્યપરાધ્યતાં સતામ્ ।
અદણ્ડ્યદણ્ડોઽસ્તુ ન મે કૃતઘ્નતામયી ક્રિયા કાપિ વિદેહનન્દિનિ ॥ ૫॥

યોષિત્સુ સર્વાસુ ચ માતૃબુદ્ધિસ્તથાઽસ્તુ મે સ્વસૃમતિઃ પ્રરૂઢા ।
બાલેષુ સર્વેષુ ચ બન્ધુબુદ્ધિર્મા નીચબુદ્ધિઃ સતતં મમાસ્તુ ॥ ૬॥

વિશ્વાસઘાતો ન તથા કદર્યતા નાભક્ષ્યપેયાશનપાનમસ્તુ મે ।
ન શાસ્ત્રસંવર્જિતકર્મસુ સ્પૃહા કદાપિ ભૂયાન્મહિતે મહીયસામ્ ॥ ૭॥

સહિષ્ણુતા ક્ષાન્તિરમન્દશેમુષી વાત્સલ્યતાઽવ્યાજકૃપા વિનમ્રતા ।
ઉદારતા હી મૃદુતા સુશીલતા ન જાતુ ચૈતા હૃદયં ત્યજન્તુ મે ॥ ૮॥

મદાશ્રિતા ક્લેશયતા ન સન્તુ વૈ વિશેષતો ભાગવતા ઉપેક્ષયા ।
નાભ્યાગતાઃ ક્રૂરગિરા દૃશાર્દિતાઃ સમુચ્છ્વસન્તુ સ્મયદૂષિતાત્મનઃ ॥ ૯॥

ઋતે ત્વદુચ્છિષ્ટમથાન્યવસ્તુષુ સ્યાદ્ ભોગબુદ્ધિર્ન કદાપિ મામકી ।
ત્વદર્થમેવાખિલચેષ્ટિતં હિ મે ભક્તાપરાધો ન કદાપિ માં સ્પૃશેત્ ॥ ૧૦॥

રતિઃ પ્રવૃત્તૌ વિરતિર્નિવૃત્તૌ સઙ્ગોઽસતાં નાસ્તુ સતામસઙ્ગઃ ।
સર્વેષુ સર્વાસ્વનુરાગદૃષ્ટિર્મા દોષદૃષ્ટિર્મમ કર્હિચિત્ સ્યાત્ ॥ ૧૧॥

સ્વભૃત્યસમ્પોષણસક્તચેતસા નોપેક્ષિતાઃ સન્તુ મયા ત્વદાશ્રિતાઃ ।
લોભાદ્ ભયાદ્ વા નિજધર્મવર્જિતા ક્રિયાઽસ્તુ નો કાઽપિ તવાનુકમ્પયા ॥ ૧૨॥

સ્વપ્નોપમં માનુષમેત્ય જન્મ સ્વર્વાસિમૃગ્યં ક્ષણભઙ્ગુરઞ્ચ ।
વૈરં ન કુર્યાં તવ તુષ્ટિકામઃ કેનાપ્યહં શ્રીનિમિવંશભૂષે ॥ ૧૩॥

ન્યાયાલયં તે ક્ષમતાપ્રધાનં ન્યાયપ્રધાનં ન વદન્તિ સન્તઃ ।
ક્ષાન્તિપ્રધાના મતિરસ્તુ તસ્માન્ ન્યાયપ્રધાના ન મમ ક્ષમાબ્ધે ॥ ૧૪॥

ભયં ન મે સ્યાચ્ચરતઃ સ્વધર્મં કાલાદપિ પ્રાપ્તવિવેકદૃષ્ટેઃ ।
મત્તસ્તથા તન્ન પિપીલિકાનાં સૌભાગ્યમેતત્ કૃપયા પ્રયચ્છ ॥ ૧૫॥

સ્વશિક્ષયૈવાદૃઢયન્ સ્વધર્મં સમાશ્રિતાન્ ભાગવતે પ્રધાને ।
અનેકસાંસારિક ભોગસક્તં ન કાઙ્ક્ષિતં જન્મ ચિરાય લોકે ॥ ૧૬॥

ત્વદ્ધામવાસસ્તવ કીર્તિગાનં ત્વન્નામસઙ્કીર્ત્તનમેવ નિત્યમ્ ।
અમ્બાશુભોત્સઙ્ગવિહારશીલે ત્વદ્રૂપસઞ્ચિન્તનમસ્તુ મહ્યમ્ ॥ ૧૭॥

અન્યાન્યદેવાર્ચનવન્દનસ્મૃતિસ્તવ પ્રપત્તિઃ શ્રવણાનુરાગિતા ।
સ્વપ્નેઽપિ ભૂયાદિહ ભક્તિકણ્ટકં નાનન્યતા પાઠપરાયણસ્ય મે ॥ ૧૮॥

પૂજ્યાનુવન્દ્યા પરિભાવનીયા જ્ઞેયાનુગેયા સમુપાસનીયા ।
શ્રેયઃ પરં કાઙ્ક્ષિભિરાત્મનિષ્ઠૈસ્ત્વામેવ હિત્વાઽખિલકર્મજાલમ્ ॥ ૧૯॥

સ મે પિતા સા જનની સ બન્ધુઃ સખા સ દાતા સ પતિર્ગુરુઃ સઃ ।
કૃપાલુતોપેક્ષિતસર્વદોષઃ સેવાસહાયો ય ઇહાસ્ત્વનીહઃ ॥ ૨૦॥

પરમલાલનૈઃ પાલ્યતે ત્વયા નિરયકર્મકૃન્માદૃશો જનઃ ।
કરુણયા યયા હેતુહીનયા કુરુ ન માં તયા સેવયોજ્ઝિતમ્ ॥ ૨૧॥

વિનય એવ મેઽયં હિ સાઞ્જલિઃ સુનયનાઙ્કભૂષે પ્રસીદતામ્ ।
અનુદિનં તવોચ્છિષ્ટજીવતો વનરુહાક્ષિ નો ચેત્તુ કા ગતિઃ ॥ ૨૨॥

ઇતિ શ્રીખોજીદેવાચાર્યવિરચિતં શ્રીજનકજાપ્રપત્તિસારસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

*Shrijanakajaprapattisara Stotram*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*